सर्व्वेषामयुष्मच्छब्दः। तस्य त्रिषु लिङ्गेषु समानि रूपाणि। (एकविंशतिविभक्तिषु तस्य रूपाणि।) यथा। त्वम् १ युवाम् २ यूयम् ३। त्वाम् ४ युवाम् ५ युष्मान् ६। त्वया ७ युवाभ्याम् ८ युष्माभिः ९। तुभ्यम् १० युवाभ्याम् ११ युष्मभ्यम् १२। त्वत् १३ युवाभ्याम् १४ युष्मत् १५। तव १६ युवयोः १७ युष्माकम् १८। त्वयि १९ युवयोः २० युष्मासु २१। (द्वितीयाचतुर्थीषष्ठीनामेकवचनद्विवचनबहुवचनविभक्तिषु तस्य रूपान्तराणि यथा। द्वितीयैकवचने त्वा। चतुर्थीषष्ठ्योरेकवचने ते। आसां द्विवचने वाम्। आसां बहुवचने वः। श्लोकपादे वाक्यादौ च-वा-हा-ह-एव-शब्दयोगे अदर्शनार्थकभिन्नार्थ-धातुयोगे च न स्युः।) इति व्याकरणम्॥ यथा,—

"युष्मत्कृते खञ्जनगञ्जनाक्षि !
शिरो मदीयं यदि याति यातु।
नीतानि नाशं जनकात्मजार्थं
दशाननेनापि दशाननानि॥"

इति सुक्तिवादे गदाधरः॥)

यूः, स्त्री, यूषः। इति हेमचन्द्रः। ३। ६८॥

यूकः, पुं, (यौतीति। यु + "अजियुधूनीभ्यो दीर्घश्च।" उणा० ३। ४७। इति कन् दीर्घश्च।) मत्कुणः। इति जटाधरः॥ (यथा, सुश्रुते सूत्रस्थाने ३१ अध्याये।
"यूका ललाटमायान्ति बलिं नाश्नन्ति वायसाः।
येषां वापि रतिर्नास्ति यातारस्ते यमालयम्॥")

यूका, स्त्री, (यूक + स्त्रियां टाप्।) मत्कुणः। यग्नी इति उकुण इति च भाषा। तत्पर्य्यायः। केशकीटः २ स्वेदजः ३ षट्पदः ४। इति राजनिर्घण्टः॥ पाली ५ बालकृमिः ६। इति जटाधरः॥ (यथा, मनौ। १। ४५।
"स्वेदजं दंशमशकं यूकामक्षिकमत्कुणम्।
उष्मणश्चोपजायन्ते यच्चान्यत् किञ्चिदीदृशम्॥"
क्रिमिविशेषः। तद्यथा,—
"नामतो विंशतिविधा बाह्यास्तत्र मलोद्भवाः।
तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः॥
बहुपादाश्च सूक्ष्माश्च यूका लिक्षाश्च नामतः।
द्विधा ते कोठपिड़काः कण्डूगण्डान् प्रकुर्व्वते॥"
इति माधवकरसंगृहीतरुग्विनिश्चये क्रिम्यधिकारे॥
"क्रिमयो द्विविधाः प्रोक्ता बाह्याभ्यन्तरसम्भवाः।
बाह्या यूकाः प्रसिद्धाः स्युः किक्षुलूकास्तथान्तराः॥
सप्तधा हि भवेद्बाह्याः षड्धा चान्तःसमुद्भवाः।
तेषां वक्ष्यामि संभूतिं बाह्यानाभ्यन्तरे नृणाम्॥
रूक्षादति बलात् स्वेदाच्चिन्तया शोचनादपि।
कफधातुसमुद्भूतास्तीक्ष्णा यूका भवन्ति हि॥
यूकाः कृष्णाः पराः श्वेतास्तृतीयाश्चर्म्मणि स्थिताः।
सूक्ष्मातिविकटा रूक्षाश्चर्म्माभाश्चर्म्मयूकिकाः॥
चतुर्थी विन्दुकी नाम वर्त्तुला मूत्रसम्भवा।
मत्कुणाद्याश्च पञ्चान्यो बाह्योपद्रवकारिणः॥
यूका मस्तकसंस्थाने श्वेता वस्त्रनिवासिनी।
चर्म्मयूका नेत्रचर्म्मे सूक्ष्मे रोमणि यष्टिका॥"
इति हारीते चिकित्सितस्थाने पञ्चमेऽध्याये॥
यूकानाशकौषधं यथा, कामरत्ने।
"विड़ङ्गगन्धोत्पलकल्कयोगात्
गोमूत्रसिद्धं कटुतैलमेतत्।
अभ्यङ्गयोगेन शिरोरुहाणां
यूकादिलीक्षाप्रचयं निहन्ति॥
गोमूत्रेण बलामूललेपो यूकानिवारणः।
पारदं मर्द्दयेन्निष्कत्रयं धुस्तूरजद्रवैः॥
नागवल्लीद्रवैर्व्वाथ वस्त्रखण्डं प्रलेपयेत्।
तद्वस्त्रं वेष्टयेन्मौलौ धार्य्यं यामत्रयं तथा॥
यूका पतन्ति निःशेषान्मस्तकान्नात्र संशयः।
हरिनिशानवनीतेन लेपान्मौलौ प्रकण्डुनुत्॥
नीलोत्पलं तिलं यष्टि सर्षपं नागकेशरम्।
धात्रीफलं समं पिष्ट्वा लेपो यूकाविनाशनः॥
निशागन्धकगोमूत्रं विड़ङ्गकटुतैलकम्।
पारदेन समं मर्द्द्य लेपो यूकानिवारणः॥"
इति केशस्य यूकादिनिवारणम्॥
परिमाणभेदः। यथा, मार्कण्डेये। ४९। ३७।
"परमाणुः परं सूक्ष्मं त्रसरेणुर्म्महीरजः।
बालाग्रञ्चैव निष्कश्च यूका चाथ यवोदरम्॥")

यूतिः, स्त्री, (यु + "ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च।" ३।३।९७। इति क्तिन् निपातनाद्दीर्घत्वञ्च।) मिश्रणम्। इति मुग्धबोधव्याकरणम्॥ (यथा, भट्टिकाव्ये। ७। ६९।
"करोमि वो बह्वियूतीन् पिबध्वं पाणिभिर्द्दशः॥")

यूथं, क्ली, (यु मिश्रणे + "तिथपृष्ठगूथयूथप्रोथाः।" उणा० २। १२। इति थक्प्रत्ययेन निपातितम्।) सजातीयसमूहः। इत्यमरः। २।५।४१॥ (यथा, रामायणे। २। ५४। ४१।
"तत्र कुञ्जरयूथानि मृगयूथानि चैव हि।
विचरन्ति वनान्तेषु तानि द्रक्ष्यसि राघव !॥")

यूथनाथः, पुं, (यूथस्य नाथः।) वन्यकरिणां समूहस्य ईश्वरः। तत्पर्य्यायः। यूथपः २। इत्यमरः। २। ८। ३५॥

यूथपः, पुं, (यूथं पातीति। पा + कः।) अरण्यहस्तिनां प्रधानम्। इति शब्दरत्नावली॥ (यथा, श्रीमद्भागवते। ९। १५। २८।
"घोरमादाय परशुं सतूणं वर्म्मकार्म्मुकम्।
अन्वधावत दुर्म्मर्षो मृगेन्द्र इव यूथपम्॥"
प्रधानमात्रे च। यथा, महाभारते। १।११८।५।
"राजा पाण्डुर्म्महारण्ये मृगव्यालनिषेविते।
चरन् मैथुनधर्म्मस्थं ददर्श मृगयूथपम्॥")

यूथभ्रष्टः, पुं, (यूथाद्भ्रष्टश्च्युतः।) यूथात् पलायितहस्ती। इति शब्दमाला॥ (यूथभ्रष्टमात्रे, त्रि। यथा, श्रीमद्भागवते। ४। २८। ४६।
"यदा नोपलभेताङ्घ्रावूष्माणं पत्युरर्च्चती।
आसीत् संविग्नहृदया यूथभ्रष्टा मृगी यथा॥")

यूथिका, स्त्री, (यूथं पुष्पवृन्दमस्या अस्तीति। यूथ + ठन्। टाप्।) पाठा। इति राजनिर्घण्टः। अम्लानकः। इति मेदिनी। के, १४४॥ पुष्पविशेषः। युँइ फुल इति भाषा॥ (यथा, मेघदूते। १। २८।
"विश्रान्तः सन् व्रजवननदीतीरजातानि सिञ्चन्
उद्यानानां नवजलकणैर्यूथिकाजालकानि॥")
तत्पर्य्यायः। गणिका २ अम्बष्ठा ३ मागधी ४। सा पीता चेत् हेमपुष्पिका। इत्यमरः। २। ४। ७१॥ यूथी ५ प्रहसन्ती ६। इति त्रिकाण्डशेषः॥ शिखण्डिनी ७ वासन्ती ८। इति रत्नमाला॥ बालपुष्पिका ९ बहुगन्धा १० भृङ्गानन्दा ११। अस्या गुणाः। स्वादुत्वम्। शिशिरत्वम्। शर्करार्त्तिपित्तदाहव्रणनानात्वग्दोषनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"यूथीयुगं हिमं तिक्तं कटुपाकं सरं लघु।
मधुरं तुवरं हृद्यं पित्तघ्नं कफवातलम्।
व्रणास्रमुखदन्ताक्षिशिरोरोगविषापहम्॥"
इति भावप्रकाशः॥
(तथा च सुश्रुते उत्तरतन्त्रे ४५ अध्यायः।
"पटोलशैलुसुनिषण्णयूथिका
वटातिमुक्ताङ्कुरमिन्दुवारजम्॥")

यूथी, स्त्री, (यूथ + अर्श आद्यच्। ततो ङीष्।) यूथिका। इति शब्दरत्नावली॥

यूथीनः, पुं, (यूथं पातीति। यूथ + खः।) यूथपः। इति शब्दचन्द्रिका॥

यूनिः, स्त्री, योगम्। मिश्रणम्। इति सिद्धान्तकौमुदी॥

यूनी, स्त्री, (युवन् + ङीष्। "श्वयुवमघोनामतद्धिते।" ६। ४। १३३। इति वस्य उत्वम्।) युवती। इति शब्दरत्नावली॥ (यथा,—
"यूनी काममयी दुनोति हृदयं वैध्यव्यभावाद्वधूः।"
इति कलापे श्वयुवमघोनाश्चेतिसूत्रे कुलचन्द्रः॥)

यूपः, पुं क्ली, (यौति मिश्रयतीति। यूयते युज्यतेऽस्मिन्निति ऋग्भाष्ये सायणः। १। ५१। १४। यद्वा, यु + "कुयुभ्यां च। उणा० ३।२७। इति पः दीर्घत्वञ्च।) यज्ञे पशुबन्धनकाष्ठम्। इत्यमरः। २। ४। ४१॥ तस्य परिमाणादिर्य्यथा। स्मृतौ।
"चतुर्हस्तो भवेद्यूपो यज्ञवृक्षसमुद्भवः।
वर्त्तुलः शोभनः स्थूलः कर्त्तव्यो वृषमौलिकः॥"
भविष्ये।
"बिल्वस्य वकुलस्यैव कलौ यूपः प्रशस्यते।"
इति सामवेदिवृषोत्सर्गतत्त्वम्॥

यूपः, पुं, (यु + पः। दीर्घश्च।) जयस्तम्भः। यागस्तम्भः। इत्युणादिकोषः॥ (यथा, रघुवंशे। ६। ३८।
"संग्रामनिर्व्विष्टसहस्रबाहु-
रष्टादशद्वीपनिखातयूपः।
अनन्यसाधारणराजशब्दो
बभूव योगी किल कार्त्तवीर्य्यः॥")